This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्री [illegible]गणेशायनमः॥श्रीरामायनमः॥अथशंखचक्रगदाधारणंमलसायणीयेशं
खः॥शंखचक्राद्यंकनंतुतुलसीदलभक्षणं॥यःकुर्यान्मानवोनित्यंसयातिपरमांग
तिं॥[illegible]दंधाकंयवर्णविभागनिर्णयाभावान्नविप्रविषयं॥आश्वलायनस्मृतौषष्ठाध्या
येनि[illegible]धानू॥शिवकेशवयोश्चिन्हेभूलचक्रादिनौद्विजः॥नधारयेच्चमतिमान्वै
दिके[illegible]र्मनिस्थितः॥त्यक्तवैदिककर्माणोनास्तिकायेचनर्त्तकाः॥तेधारयेयुश्चि
न्हानित्येलयोर्भिन्नबुद्धयः॥२॥वेदाक्षरविहीनानांनास्तिकानांद्विजन्मनां॥विहित
धारणंनित्यंचिन्हानांशिवकेशवयोरित्युक्तं॥३॥अत्रमतिमान्वैदिकेवर्त्मनिस्थितइ
त्यनेनमतिभ्रष्टस्यवैदिकमार्गभ्रष्टस्यतंत्रमार्गरतस्यप्राप्तमणस्यापिगम्यते॥नच
काशीखंडेध्रुवस्तुत्यध्यायेशंखचक्रांकिततनुःशिरसामंजरीधरः॥गोपीचंदनलिप्तां
गोदृष्टश्चेत्तदघंकुतइतिध्रुवेणोक्तत्वादाश्वलायनस्मृतेस्तद्विरोधइतिवाच्यं॥शंख

Acc. No. ~~654~~ M.1590
माध्वमुखभञ्जन
श्रीकरानन्द
६
दर्शन.
10
18

K K S U LIBRARY
RAMTEK
441 106
M-1590
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्रांकिततनुरिलिंगोपी चंदनादिना नतु दाहेन ॥ बृहन्नारदीये चतुर्दशाध्याये दाहेन शं
खचक्रधारणस्य निषिद्धत्वात् ॥ तथाहि ॥ यस्तु संतप्तशंखादि लिंगचिह्नतनुर्नरः ॥ स
सर्वयातनाभोगी चांडालो जन्मकोटिभिः ॥ तद्द्विजं तप्तशंखादि लिंगांकिततनुर्नरः ॥
संभाष्य रौरवं याति यावदिंद्राश्चतुर्दश ॥ चक्रांकिततनुर्यत्र नत्रकोपि न संवसेत् ॥
यदि तिष्ठन्महापापी सहस्रब्रह्महा भवेत् ॥ गंगास्नानरतो वापि अश्वमेधरतोपि वा ॥
चक्रांकिततनुं दृष्ट्वा पश्येत्सूर्यं जपेन्नरः ॥ जपेच्च पौरुषं सूक्तमन्यथा रौरवं व्रजेत् ॥
।लिंगांकिततनुं दृष्ट्वा पश्येत्सूर्यं जपेन्नरः ॥ जपेच्च शतरुद्रीयमन्यथा रौरवं व्रजेत् ॥
ब्राह्मणस्य तनुर्ज्ञेया सर्ववेदसमाश्रिता ॥ तान्येतत्सं तापिता राजन्किमु वक्ष्यामहे वयं ॥
चक्रांकिततनुर्वापि राजन् लिंगांकितोपि वा ॥ नाधिकारी परिसेयो श्रौतस्मार्तेषु क
र्मस्विति ॥ न चातप्ततनूर्न तदामो अश्नुत इति श्रुतिविरोधेन स्मृतेरप्रामाण्यं श्रुतेर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थंतिरत्वात्॥ कृच्छ्रचांद्रायणादिनाऽतप्ततनूरसंतापितदेहोऽतएवामोऽपक्वोऽदग्ध
रागादिः पुमान्न तद्भूस्मनाश्नुते नामोतीतिश्रुतेरर्थः॥ तथाच पराशरस्मृतौ एकादशा
ध्याये। तप्तमुद्रास्त्वंत्यजाय हरिणा निर्मिता पुरा॥ भूदेवस्तप्तमुद्रादिचिन्हं कुर्याद्वि
मूढधीः॥ इहजन्मनि शूद्रश्च प्रेत्य श्वा च भविष्यति॥ हेमाद्रौ प्रायश्चित्तकांडे पद्म
पुराणे ब्रह्मशापः पाराशरे तृतीयाध्याये॥ आयुधैः शंखचक्राद्यैश्चिह्नितैरंकि
ताद्विजाः॥ अग्नितप्तैर्महामोहा द्रुवेयुश्चांत्यजा हिते॥ तथाच लिंगपुराणे॥ शंख
चक्रे तापयित्वा यस्य देहः प्रदह्यते॥ स जीवन्कुणपस्त्याज्यः सर्वकर्मबहिष्कृतः॥
तथाच विष्णुस्मृतौ॥ शंखचक्राद्यंकनं तु गीतनृत्यादिकं तथा॥ एकजातेरयं धर्मो न
जातु स्याद्द्विजन्मनः॥ यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु॥ तथा चक्रांकितो वि
प्रः सर्वकर्मसु गर्हितः॥ तथाच बोधायनः॥ नांकनीयं देहे द्दहेद्दहेच्चेत्कामं मोहितः॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नाधिकुर्वीत दग्धांगान् श्रौतेस्मार्तेषु कर्मस्क्षणाः तथा च सूतसंहितायांप
ञ्चावैष्णवेषुब्राह्मणाधमाः॥ तत्रैव एकचत्वारिंशाध्याये पातकसमुच्चय
प्रकरणे पाशांकुशगदादंडशंखचक्रादिभिर्द्विजाः॥ अंकनं विग्रहे संतः पा
तकेष्वाहुरातिकाः॥ शंखचक्रगदावज्रैरंकनं विग्रहे मोहे नैव करिष्यंति पाखंडो
पहताजनाः॥ वेदनिष्ठस्तु तान्मार्गान्मोहेनैव स्पृशेद्यदि प्रायश्चित्ती भ
वत्येव॥ नात्र कार्याविचारणा· शाकस्यापि तैः सांडूपंक्तौ वैदिक संस्थितः॥
यदि मोहेन भक्तोपि यास्तुक्त्वा चान्द्रायणं चरेत्· इत्यासनविहारादि कार्यमध्यप
नक्षेत्॥ यदितैर्मोहितः कुर्यात्कुर्याच्चान्द्रायणं बुधः॥ धर्मादिविज्ञानंना
रदीतच्छ्रौतिस्थिनः तेभ्यो मोहादपि प्राज्ञः श्रेयस्कामी कदाचन· वेदमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्गानुबाह्येषुसंस्थितायेचकर्मस्थ·तेतुपाखंडिनःसाक्षात्तथातैःसहवासिनः
॥तथाचकौर्म्येपाखंडिनोविकर्मस्थान्वामाचार्यांस्तथैवचःपांचरात्रान्पा
शुपतान्वाङ्मात्रेणानार्चयेत्·याजनंयोनिसंबंधंसहवासंचभाषणंकुर्वा
णःपततेजंतुस्तस्माद्यत्नेनवर्जयेत्·तथाचसूतसंहितायांज्ञानयोगखं
डेविंशाध्याये·स्थापितेवैदिकेमार्गेसकलस्यस्थितंभवेत्·योवैस्थाप
यितुशक्तःनकुर्यान्मोहितंनरः॥तस्यहंतासपापीयानितिवेदांतनिर्ण
यः॥योवैविद्याभिमानेनवेदमार्गप्रवर्तकान्·घतच्चौसर्वोदिभिर्जीया
समहापातकीभवेत्·पुनःसूतसंहितायांब्रह्मगीतासूपनिषत्सुसप्तमा
ध्याये·तथातंविग्रहंकुर्यात्स्वशास्त्रानखादिभिः॥नतथालोहितंकु
र्याद्यदिकुर्यात्तनस्यचःस्वदेहेपरदेहेवानकुर्यादंकनंनरः॥यदिकुर्यात्तु

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्राद्यैर्पबसबनसशय: रहस्यं सर्वशास्त्राणामयाप्रोक्तं समासत:॥
शारीरं देवलारूपभजखंयूयमास्तिका:॥ तत्रैवाष्टमाध्याये॥ वेदमा
र्गैकनिष्ठस्तमोहनादंकितोयदि पतत्येवनसंदेह: तथापुंड्रंसरादपि
लौकनविग्रहेकुर्याद्विरपंथा: सदीद्विज:॥ पुंड्रांतरंभयाद्यपिललाटेनै
वधारयेत् तथाचमनुस्मृतावपि॥ काष्टमालांधरंविप्रंपतितंयानया
यिनं शूद्रमक्षरसंयुक्तंदूरत: परिवर्जयेत् आदित्यपुराणेअष्टादशाध्या
येभस्मधारणविधि:॥ भालेनदृश्यतेयस्य भूतिशासनमैश्वरं तेनब्राह्
ण: शाफ: त्रयोपिस्युर्विमानिता:॥ अपित्रैलोक्यकर्तारंप्रणामेन्नैवतंपश्च॥ त्रि
पुंड्रधारीसततंब्राह्मण: सर्वकर्मसु॥ तन्द्रस्मधारणं दृष्ट्वाचाचानिंदंतिमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा:॥ तेषां शूद्रेण संभूतिरनुमेया हि सूरिभिः॥ गोपीचंदनहीने रक्तविभूति
यैश्च धार्यते॥ तन्मुखं शवशववन्नातिबहलतेजोनदृश्यते ऊर्ध्वपुंड्रं च लिंगस्या
तृतिर्यक्पुंड्रं हरिः स्मृतः उभयं धारयेद्विद्वान्सराव माधवः स्मृतः॥ इति
वासिष्ठाह्निके गायत्रीकल्पे॥ यज्ञोपवीतवद्धार्यं गोपीचंदनभस्मनी· तयो
रेकं परित्यज्य ब्राह्मणः पतितो भवेत्॥ शाखा सूत्रं च पुंड्रं च समयाचारमेव
च॥ पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत् इति शातातपः॥ कर्णे च पुष्पं तु
लसीवत्सस्य परिवर्जना॥ यावद्धारयते विप्रः तावच्छूद्रो न संशयः॥ इति क
र्णे तुलसीपुष्पधारणनिषेधः॥ अथ शिवनिंदाकृतस्य प्रायश्चित्तमाह॥
स्कांदे शिवरहस्ये सप्तमांशे ब्रह्मोवाच॥ भ्रमेण परिहासेन शाठ्येनान्येन वा द्वि
जा॥ शिवनिंदाकृता येन मतेन प्राप्येव यातना॥ भ्रमेणापि करस्पृष्टो वह्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई:खब्रसेयथा॥ तथैवदु:खदंनिसमन्येशंकरदूषणे॥ कूलस्पर्शीदहस
ग्नि:शिवदूषणपावक:॥शिवदूषकपापिष्ठकुलंदहतिसर्वथा॥ ब्रह्महत्या
र्जितंपापंकदाचित्राशमेष्यति॥ शिवनिंदनराजितंपापंननश्यत्सेवसर्वथा
॥शिवनिंदकजिह्वाग्रंयमस्तस्याश्चधारया- सदादहतितीव्रेण क्षोभि
त:क्रोधसंकुल:॥धिक्जन्मतवदुर्वृत्तमहापातकसंकुल॥धिक्कुशी
लंतवदु:शीलशिवदूषकदुर्मते॥तवोनपालकोलोकेनत्वचोनारकी
ध्रुव॥असंभाष्योनिरीक्ष्योनपुलस्त्वशिवनिंदक॥अस्माभिरपिपापानि
संस्थानिनसंशय:॥महेशनिंदकेरनाधयत:संभाषणंकृतं॥वसिष्ठउवा
च॥उपवासेनविधिवत्अहोमुंडनपूर्वकं॥पंचगव्यंप्रलक्षेनयाऽथशंक
रनिंदकै:ततोतर्पहयाणांकार्यसार्धशतत्रयं॥ततःपंचक्रोशियात्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शतकं कार्यमादरात् ॥ ततश्री बरहस्यस्थं काशीमाहात्म्यमुत्तमं ॥ सहस्र
वारं यत्नेन पठनीयं समाहितैः ॥ तस्य स्तस्तद्दशांक मंत्रैरकं तिलहोमोयथाक्रमं
॥ कर्तव्यो शतपर्यंतं तिलाज्यादिभिरुत्तमैः ॥ तदष्टाविंशत्सहस्रा शैवाः
शिवपरायणाः ॥ भोजनीयाः प्रयत्नेन देयाच स्वर्णदक्षिणा ॥ एतावदति
यत्ने क्रियते यदि सादरं ॥ तदा तस्यापशुद्धिर्हि भविष्यति न संशयः ॥
शंखचक्रादिधारणे प्रायश्चित्तमाह ॥ तत्र वं स्कंदे पुराणे ॥ पूर्वज
स्यतनुर्दग्धा शंखचक्रादिभिः पृथक् ॥ न तस्य निष्कृतिर्दृष्टा स्नानदाना
जपादिभिः ॥ निष्कृतिरेवा खिपाशार्येण भाषिता ॥ केशान संवाप
यित्वा तु पुनः कर्म समाचरेत् ॥ कैर्भगोलात्समुद्रस्य गर्भीयानादिपूर्वकं
॥ षष्ठ्यार स्त्रोवरु ग्णाणां प्रायश्चित्तमुदीहृतं ॥ कौर्म्ये ॥ अज्ञात्वा मुख

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जे भ्यस्तु मुद्रादाघेभ्य आस्तात्॥ स्फुवर्णमात्रसंग्राहीप्राणापर्त्संस
माचरेत्॥ यमः॥ नांकनीयंस्हेद्राग्रं देवताष्फुघस्नांछतैः॥ रहूना
हुस्वनाछापि पातिस्रं यातितक्ष्सणार्त्रति॥ वैश्वदेवानंतरं मैवेद्यं
कार्यं॥ पुराणधर्मवैक्ष्णवैस्तु विष्ठेणार्निवेदितान्नेन यष्टव्यं देवता
तरमितिपुराणवचानारौदेवपूजांकूत्वावैश्वदेवस्य कर्तव्यतायाः
बोधितत्वात्तथैव कुर्वंति॥ वैश्वदेवानंतरं देवतानैवेद्यं कुर्यादिति बह
वः॥ आश्वलायनानांतुगृह्यपरिशिष्टे॥ स एष देवयज्ञोह रहर्गोदा
नसंमितः सर्वाभीष्टप्रदः स्वर्ग्यापवर्ग्यश्च तस्मादेनमहरहः कुर्वीतत
मेनं वैश्वदेवं हुतशेषेण पृथगन्नेन चाकुर्यात् तस्य शेषेण वैश्वदेवं
कुर्यादित्युक्तत्वात्॥ आदौ वैश्वदेवं ततो देवपूजेति युक्तं॰ आचार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

दीपभट्टकमलाकरः॥ वैश्वदेवं पुराकृत्वा नित्ये चाभ्युदये तथा॥ स्वा
भीष्टदेवतादिभ्यो नैवेद्यं विनिवेदयेत्॥ अकृत्वा वैश्वदेवं तु नैवेद्यं यो नि
वेदयेत्. तदन्नं नैवेद्यं वगः णं लिदेवाविष्ण्वादयो ध्रुवमित्याश्वलायन
स्मृतावुक्तत्वात् तथा वैश्वदेवविधिं कृ नैवेद्यादीन् प्रकल्पयेत्. स्नातः
स्पर्शाधिकारी स्यात् संध्या शुद्धोम नोर्जपो वैश्वदेवविशुद्ध्यो सो विष्णो
रन्नं निवेदयेदिति. धर्मप्रदीपे वृद्धमनूक्तेः॥ माधवीये प्रयोगपारि
जातादावपि देवार्चनात्प्रागेव वैश्वदेवक्रियोक्तरित्यलं अथ नैवेद्यप्रक
रणविषये कानिचिद्वाक्यानि भक्तशेषपराणि तद्भक्षणं नास्माकं
प्रतिकूलं. इतराणि तु नैवेद्यप्रशंसापराणि. न तु स्वयं निवेद्यस्वयंग्रा
ह्यमिये तदर्थबोधकानि चेति प्रतीमः॥ कुतः स्वयं निवेद्यस्वयं

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवेद्यस्य यं यहणे दोषः तत्कथं · आदौ देवतायाउपहासः ततः स्व
दत्तापहणं · पश्चाद्देवस्य भुजः देवलकप्राप्तिरिति प्रतिभाति · त
दपरियज्ञार्थमुच्छिष्टग्रहणमेव नास्ति · तथा च उच्छिष्टोच्छिष्टसं॥
स्पर्शी शुना शूद्रेण वा द्विजः॥ उपोष्य रजनीमेकां पंचगव्येन
शुध्यतीति स्मृतौ यत्स्पर्शमात्रे दोषः किमुत न्दोजने · यत्तु त्वयो
पक्षतत्स्वर्गाध्यवासो लंकारचर्चितौ उच्छिष्टपनोजिनो दासास्तव
मायां जयेमहीतियस्त्वागवतीयं वाक्यं तदस्य वप्रश्नविषं न तु तद्द्विधा
यकं निषेधवाक्यानां बहूनामुपलभात्तु · तथा च दीपावलोकं मे नोप
शस्कधराकाद्दृशाध्यायेभगवद्दक्तिः॥ अमानित्वमदंभित्वंरू
तस्यापरिकीर्तनं · अपि दीपावलोकं मे नोपयुंज्यान्निवेदितं॥

KKSU LIBRARY
RAMTEK
441 106
M-1590
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

अत्रापिशाब्दान्निवदितमन्नमुपलभ्यते॰ तथाचतत्रैवसप्तविधाख्या
ये॰यः स्वदत्तांपरैर्दत्तांहरेत्तांस्करविप्रयोः॥ इतिंसन्नायतेविट्भुग्व
र्षाणामयुतायुतं॰ कर्तुश्चसारथेर्हेतोरनुमोदितुरेवच॰ कर्मणाभा
गिनःप्रेत्यभूयोभूयसितत्फलं॰ तथाचश्रीमद्रामायणेउत्तरका
ण्डेब्रह्मस्वंदेवद्रव्यंचस्त्रीणांबालधनंचयत्॰ दत्तंहरतियोमोहात्दि
ष्टैःसहविनश्यति॰ ब्राह्मणद्रव्यमादत्तेदेवानांचैवराघव॰सघः
पततिवैघोरेनरकेवीचिसंज्ञके॥मनसापिहिदेवस्वंब्रह्मस्वंवाहि
नस्तियः॥निरयान्निरयेचैवपततेसनसंशयः॥ तथाचपुराणां
तरेरामायणे॰ अहोराघवराजेंद्रसघकल्यानजीव्यहं॰ नश्रेयो
मिनपश्यामिस्वयंदत्तापहारिणं॥ इतिनानुवदुक्तिः॥ तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॰ देवतादत्तनैवेद्यं विप्राणां दानमुत्तमं॰ दत्तं दात्रा न भोक्तव्यमिति
शातातपोऽब्रवीत्॰ विप्रदत्तं देवदत्तं मन्त्रापहारिणं॰ यो भुंक्ते विप्र
मूढात्मा रौरवं नरकं व्रजेत्॰ शिवकेशवनैवेद्यं भुक्त्वा शेषकथं हुवे
त्॰ पूर्वशेषान्नमादाय पंच प्राणाग्निहावयत्॰ इति भगवद्वचना
त्॰ यमाहारं स्वयं भुंक्ते तद्दनास्तस्य देवता॥ पात्रांतरे तन्निहृत्स स
त्या द्वै विष्णवेर्पत्॰ तथा च सूतसंहितायां॰ विशिष्टमन्त्रं भुंजीत चि
त भुव्यर्थमात्मनः निर्माल्यं च निवेद्यं विशेषेण विवर्जयेत्॥
रुद्रेण भुक्तं निर्माल्यं न तथा देवतांतरैः॥ निवेद्यं विष्णुना भुक्तं मा
हात्म्यान्यदेवते॥ निर्माल्यं च निवेद्यं च परत्काचांद्रायणं चरेत्॥
थज्ञवैभवखंडे॥ देवद्रव्यस्य भोक्तु श्वं ब्राह्मणद्रव्यं हारिणः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

बंचनं च महापापैः शिवभक्तैः प्रकीर्तितं ॥ पुनश्च तत्रैव देवद्रव्यं गु
रुद्रव्यं चंडद्रव्यं तथैव च ॥ रौरवे ते तु पच्यंते मनसा ये तु भुंजते ॥ त
था च पांचरात्रागमे भारद्वाजसंहितायां ब्रह्मसंवादे· प्रतिमायामर्
पितं मे नार्पयेत्प्रतिमांतरे· अग्निविद्याप्रतिष्ठानेष्वपि यत्तु महाज्ञ
या· यथाग्नो संहुतं ह्यान्यं न हि संस्क्रियते यतः ॥ अर्पितं प्रतिमा
यां वै नार्पयेत्प्रतिमांतरे· तथा च प्रायश्चित्तकांडे अग्निदो गरदश्चै
व ग्रामसीमाविलोपकः ॥ ग्रामद्रोही ग्रामहारी मिथ्याब्रह्मधरश्च
यः ॥ कूटसाक्षिप्रदो यश्च यश्च न्यासापहारकः ॥ बालस्त्रीघातको
विप्रः संध्यानविवर्जितः ॥ देवब्रह्मस्वहर्ता च देवब्राह्मणनिंदकः ॥
विश्वासघातको विप्रः शूद्रान्नादश्च लुब्धकः ॥ नास्तिकः परदार्य

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चरवयंस्तापहारकः ॥ पर्वमैथुनशेवी च तथा नैसेतुभेदकः ॥ परिणीता
म्तुस्नातांस्त्रियं यो नाधिगच्छति · ब्राह्मणीं विधवां बालां योगच्छेद्धृतचारि
णीं ॥ महापातकिनोत्वेतेये चान्येतस्यपापिनः ॥ तथा च विज्ञाने श्वरे प्रा
यश्चित्ताध्याये · च्यवनः श्वश्वपाकं प्रेतधूम्नं देवद्रव्योपजीविनं ग्रामयाज
कं सोमविक्रयिणं यूपं चितिकाष्ठं मद्यभाण्डं सस्नेहमानुषास्थि शवस्प
ष्टं रजस्वलां महापातकिं शावं स्पृष्टा सचेलं मभ्युपगाह्योत्तीर्याग्निंस्प
ष्ट्वा गायत्र्यष्टशतं जपेत् · घृतं प्राश्य पुनः स्नात्वा त्रिराचमेत् इति · त
था च स्मृत्यन्तरे · स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् · तथा
च स्मृत्यर्थसारे · प्रायश्चित्ताध्याये · शैवसौरनिर्माल्यभक्षणे चान्द्रा
यणं · अभ्यासे द्विगुणं मत्याभ्यासे सांतपनं · अन्यनिर्माल्येप्यनापद्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमिति· तथाचवायुपुराणेमाघमहात्म्येएकादशाध्याये·अदैवतस्य
जन्मांतरस्मरणवाक्यं·पुराहंगपाकश्चास्मि वेदवेदवेदांतपारगः॥नाम्ना
ग्निदत्तइत्यासंकाश्यांकाश्यपगोत्रजः॥राज्ञादत्ताधिकारस्ततोदेवा
लयेमयाहृतंदेवस्वसर्वस्वंचान्येस्तैलेघृतेपिच·पिष्टशाकेगुडेचैव
तंडुलेमरिचादिषु·कुड्याधारंकालेषुजीविकासुमयाहृतंगृहीतम
तुलंद्रव्यंअतिक्रम्यस्ववेतनं·राजद्वारेप्रवक्तृणांदेवस्वंदत्तवानहं·तेन
चाहंदैवतोनामजातोब्रह्मराक्षसः॥तथाचमाधवाचार्योक्तिः·सदा
चाररतोभक्तःशेषंभगवतोभस्त्यातिथिपुरःसरः॥नतुभुक्ते॥त
थाचकार्तीकमाहात्म्येएकविंशाध्याये·विष्णुशर्मोक्तिः॥पुराणेचर्म
शास्त्रेन्यायोवशः·श्रुत्याविरुध्यते·सतांत्रिकस्तुविज्ञेयोनग्राह्योवैदिके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजे ॥ इत्यलमतिप्रपंचेन॰ अथ शिवज्ञानाप्तिकारणान्याह॰ पुनःस्व
नसंहितायां मुक्तिखंडे षष्ठाध्याये॰ ईश्वरउवाच॰ अथातः संप्रवक्ष्या
मिज्ञानानुप्तत्तिकारणं शृणुष्वं श्रद्धयायुक्तः परिहाराय केशव॰ शिव
द्रोहस्तु विज्ञानानुत्पत्तेर्मुख्यकारणं शिवभक्तापराधश्च शिवज्ञानस्य
दूषणं॰ त्रिपुंड्रोद्धूलनद्वेषः रुद्राध्ययनवर्जनं ॥ रुद्राक्षधारणाभावोज्ञा
नानुत्पत्तिकारणं ॥ देवद्रोहस्त्वदीयानां प्रद्वेषश्च जनार्द्दन ॥ त्वदीयवचन
नांच्छा च ज्ञानानुत्पत्तिकारणं॰ वेदवेदांतविद्वेषः तदनुत्पत्तिकारणं ॥ वे
श्रोत्रिस्मरणापराधश्च तदनुत्पत्ति॰ वेदांगानांच विद्वेषः स्मृतीनां च तथै
वच॰ पुराणानांच विद्वेषो भारतस्य तथैवच॰ तेषांमध्ये तु विद्वेषस्तेषां बा
धश्च केशव॰ तेषामर्थापहारश्च ज्ञानानुत्पत्तिकारणं ॥ वामपाशुपता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीनामश्रौतानांपरिग्रहः॥ पांचरात्रागमश्चापिज्ञानानुपपत्तिकारणं॥ य
ज्ञावैष्णवखंडेकर्मविपाकप्रकरणेसप्तमाध्याये॰ पुण्यस्यप्रतिबंधी
क्रिमिर्भवेत्॰ देवद्रव्यापहारीस्यान्मनुष्योवायुभक्षकः॥ तथाकारामभे
त्तास्यादंगहनस्तमानवइति॰ तथाचधर्मप्रदीपे॰ योवैदिककर्मनादृत्यकर्म
स्मार्तेतिहासकं॥ मोहोंस [redacted] न विषोनतत्पुण्येनयुज्यते॰ प्रधानंवै
दिकंकर्मगुणभूतंचनेतरत्॰ गुणभूतंप्रधानंचहित्वागच्छेदधोग
तिमितिसर्वरमणीयमिदं॥ इतिश्रुतिस्मृतिसिद्धांतविलसितमाध्व
मुखभंजनाख्यग्रंथःसमाप्तिमगात्॰॥ श्रीमच्छंकरानंदश्रीचरणकम
लमकरंदामोदनंदितागुरवोविलसंतुतरामिहभूमंडले॥ ॥ इदं
पुस्तकं। कीलकनामाब्दे माघकृष्णप्रतिपदी रात्रौसमाप्तः॥

१०

KKSU LIBRARY RAMTEK 441 106 M-1590 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.10.20 13:26
,TRANSFERRED=2020/10/17 at 13:30:13
,PAGES=19
,TYPE=STD
,NAME=S0004088
,Book Name=M-1590-MADHAVMUKH BHAJAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection